श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवरवरमुनिभिरनुगृहीतं

# ॥ श्रीदेवराजमङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीदेवराजमङ्गळम् ॥

यश्चक्रे देवराजस्य मङ्गळाशासनं मुदा।
तं वन्दे रम्यजामातृमुनिं विशदवाग्वरम् ॥

मङ्गळं वेधसो वेदिमेदिनीगृहमेधिने।
वरदाय दयाधाम्ने धीरोदाराय मङ्गळम् ॥ 1 ॥

वाजिमेधे वपाहोमे धातुरुत्तरवेदितः।
उदिताय हुतादग्नेरुदाराङ्गाय मङ्गळम् ॥ 2 ॥

यजमानं विधिं वीक्ष्य स्मयमानमुखश्रिये।
दयामानदृशे तस्मै देवराजाय मङ्गळम् ॥ 3 ॥

वारिदश्यामवपुषे विराजत्पीतवाससे।
वारणाचलवासाय वारिजाक्षाय मङ्गळम् ॥ 4 ॥

अद्यापि सर्वभूतानामभीष्टफलदायिने।
प्रणतार्तिहरायास्तु प्रभवे मम मङ्गळम् ॥ 5 ॥

दिव्यावयवसौन्दर्यदिव्याभरणहेतये।
दन्तावलगिरीशाय देवराजाय मङ्गळम् ॥ 6 ॥

पुरुषाय पुराणाय पुण्यकोटिनिवासिने।
पुष्पितोदारकल्पद्रुकमनीयाय मङ्गळम् ॥ 7 ॥

काञ्चनाचलशृङ्गाग्रकालमेघानुसारिणे।
सुपर्णांसावतंसाय सुरराजाय मङ्गळम् ॥ 8 ॥

भोगापवर्गयोरेकं वाञ्छद्भ्यो ददते द्वयम्।
श्रीमद्वरदराजाय महोदाराय मङ्गळम्॥ 9॥

मतङ्गजाद्रितुङ्गाग्रशृङ्गशृङ्गारवर्ष्मणे।
महाकृपाय मद्रक्षादीक्षितायास्तु मङ्गळम्॥ 10॥

श्रीकाञ्चीपूर्णमिश्रेण प्रीत्या सर्वाभिभाषिणे।
अतीतार्चाव्यवस्थाय हस्त्यद्रीशाय मङ्गळम्॥ 11॥

अस्तु श्रीस्तनकस्तूरीवासनावासितोरसे।
श्रीहस्तिगिरिनाथाय देवराजाय मङ्गळम्॥ 12॥

मङ्गळाशासनपरैः मदाचार्यपुरोगमैः।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गळम्॥ 13॥

॥ इति श्रीदेवराजमङ्गळं समाप्तम्॥

sunder kidāmbi
prapatti dot com
sunder kidāmbi